**कीर्त्तित** त्रि० चु० क्त—कीर्त्तादेशः क्त । १कथिते—२ख्याते च ।

**कीर्त्तिभाज्** पु० कीर्त्तिं भजते भज—ण्वि १द्रोणाचार्य्ये शब्दरत्ना० । २कीर्त्तियुक्ते त्रि०

**कीर्त्तिमत्** त्रि० कीर्त्तिरस्त्यस्य मतुप् । १कीर्त्तियुक्ते स्त्रियां ङीप् । विश्वदेवान्तर्गते श्राद्धदेवभेदे पु० २विश्वेदेवाश्च भा० आनु० ९१ अ० दर्शिता यथा "विश्वे चाग्निमुखा देवाः सङ्ख्याताः पूर्व्वमेव ते । तेषां नामानि वक्ष्यामि भागार्हाणां महात्मनाम् । बलं धृतिर्विधाता च पुण्यकृत् पावनस्तथा । पार्ष्णिक्षेमी समूहश्च दिव्यसानुस्तथैव च । विवस्वान् वीर्य्यवान् ह्रीमान् कीर्त्तिमान् कृत एव च । जितात्मा मुनिवर्य्यश्च दीप्तरोमा भयङ्करः । अनुकर्म्मा प्रतीतश्च प्रदाताऽथांशुमांस्तथा । शलाभः परमक्रोधी धीरोष्णी भूपतिस्तथा । स्रजो वज्री वरी चैव विश्वेदेवाः सनातनाः । विद्युद्वर्च्चाः सोमवर्च्चाः सूर्य्यश्रीश्चेति नामतः । सोमपः सूर्य्यसावित्रो दत्तात्मा पुण्डरीयकः । उष्णीनाभो नभोदश्च विश्वायुर्दीप्तिरेव च । चमूहरः सुरेशश्च व्योमारिः शङ्करो भवः । ईशः कर्त्ता कृतिर्दक्षो भुवनो दिव्यकर्म्मकृत् । गणितः पञ्चवीर्य्यश्च आदित्यो रश्मिमांस्तथा । सप्तकृत् सोमवर्च्चाश्च विश्वकृत् कविरेव च । अनुगोप्ता सुगोप्ता च नप्ता चेश्वर एव च । कीर्त्तितास्ते महाभागाः कालस्यागतिगोचराः" ।

३वसुदेवज्येष्ठपुत्रे "वसुदेवस्तु देवक्यामष्टौ पुत्रानजीजनत् । कीर्त्तिमन्तमित्यादि" भाग० ९,२१,२५ ।

**कीर्त्तिशेष** त्रि० कीर्त्तिःशेषोऽस्य । नामशेषे मृते शब्दचि०

**कील** बन्धे भ्वादि० पर० सक० सेट् । कीलति अकीलीत् । चिकील कीलः । कीलितः कीलनम् । प्रनिकीलति

**कील** पु० कील—बन्धे यथायथं भावकरणादौ घञ् । १वह्निशिखायां २शङ्कौ (गोँज) अमरः । ३स्तम्भे (खोँटा) ३लेशे ४कफोणौ मेदि० ५कफोणिनिम्नदेशे विश्वः । "परिखाश्चापि कौरव्य ! कीलैः सुनिचिताः कृताः" भा० ३, ६५०श्लो० ६रतिप्रहारभेदे स्त्री "कीला उरसि, कर्त्तरी शिरसि, विद्धा कपोलयोः" वात्स्या० भावे अ, ७बन्धे स्त्री

**कीलक** पु० कीलति बध्नात्यनेन करणे घञ् स्वार्थे क । १स्तम्भभेदे (खोँटा) गवादेर्दोहनकाले रोधनार्थे २काष्ठमयस्तम्भे सुभूतिः । तन्त्रोक्ते देवताभेदे३मन्त्रविशेषे न० । प्रभवादिषष्टिवर्षमध्ये ४ वर्षभेदे तत्फलञ्च "जायन्ते सर्वशस्यानि सुभिक्षं निरुपद्रवम् । सौख्यदृष्टि र्भवेद्राजन् ! कीचके च शुभं भवेत्" ज्यो० त० सप्तशतीजपाङ्गतया पाठ्ये ५स्तवभेदे न० स च "सर्वमेतद्विना यस्तु मन्त्राणामपि कीलकम्" इत्यादि । तस्य च कीलकत्वम् तज्ज्ञानं विना फलाजनकत्वात् तदुक्तं तत्रैव "कृष्णायां च चतुर्दश्यामष्टम्यां वा समाहितः ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति" इत्थं रूपेण कीलेन महादेवेन कीलितम् । यो निष्कीलां विधायैनां नित्यं जपति सम्पुटाम्" । तत्रैव तज्ज्ञानस्याभावे निष्फलत्वोक्तेश्च तच्च गुरुलघुभेदेन द्विविधं गुप्तवत्यां विवृतिः" । तेन कृष्णाष्टमीचतुर्दश्योः नूतनार्जितधनस्य देवातिथ्यादिभ्यो यथोचितांशदानं तदवशिष्टस्य स्वायत्तीकरणमावश्यकं तद्विना सप्तशतीजपस्य न फलजनकत्वमिति गम्यते "अर्गलं कीलकं चादौ पठित्वा कवचं पठेत्" तत्रैव

**कीलसम्पर्श** पु० कीलं तदुपकारं संस्पृशति सम्+स्पृश—अण् उप०स० । (गाव)वृक्षभेदे शब्दच०

**कीलाल** पु० कीलाय बन्धाय अलति पर्य्याप्नोति अल—अच् ष०त० । १पशौ२बन्धनयोग्ये त्रि० मेदि० । "कीलां वह्निशिखां कीलं स्तम्भबन्धं वाऽलति वारयति अल—अण् उप०स० । ३जले कीलां तद्वर्णमलति याति । ४रुधिरे न० अमरः ५अमृते ६मधुनि च शब्दर० । मधुनः शीघ्रसंग्राहकत्वेन बन्धहेतुत्वात् तथात्वम् । "ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम्" यजु० २,४,७ । ७रसे पु० । "अथोअन्नाय कीलालः उपहूतो गृहेषु" यजु० ३,१३, तत्र रुधिरे "सद्यःकृत्तकठोरकण्ठविगलत्कीलालधारोज्ज्वलैः" । जले "कीलालजं न खादेयं करिष्ये चातुरव्रतम्" । भा०व०अ० "कीलालजं जलजम्" ।

**कीलालधि** पु० कीलालं धीयतेऽस्मिन् धा—आधारे कि ६त० । समुद्रे शब्दच०

**कीलालप** पुंस्त्री कीलालं रुधिरं पिवति पा—क । रुधिरपे राक्षसे रत्नमा० स्त्रियां ङीष् "स च कीलालोपयस्तु पराद्धं भोक्तुमिच्छति" भा०व०१२२४१ । [२बन्धे न० ।

**कीलित** त्रि० कील—क्त । १बद्धे २जातकीले च भावे—क्त ।

**कीयत्** त्रि० कियत् +पृषो० वेदे नि० दीर्घः । कियदित्यर्थे "आः कीयतः ललूकं चकर्थ" ऋ० ३,३०,१७,

**कीश** पुंस्त्री कस्य वायोरपत्यम् अत—इञ् किः हनुमान् ईशो यस्य कुत्सितं शेते शी—ड वा । वानरे अमरः स्त्रियां जातित्वात् ङीष् । २सूर्य्ये कपिकपोलतुल्यवर्णत्वात् तस्य ३पक्षिणि च शब्दर० कुत्सितशयनात्तस्य तथात्वम् ४नग्ने मेदि० । कीशवद्वस्त्रराहित्यात्तस्य तथात्वम् ।